अघासुरः, पुं, (अघनामा असुरः शाकपार्थिवादित्वात् समासः मध्यपदलोपश्च) अघनामासुरः। स च कंसराजसेनापतिः। इति श्रीभागवतं ॥

अघोः, [स्] व्य, सम्बोधनं। यथा अघो यज इति बोपदेवः ॥

अघोरः, पुं, (न घोरः सौम्यरूपः "या ते रुद्र! शिवा तनुरघोरा पापनाशिनी" इति वेदः।) महादेवः। इति शिवचतुर्द्दशीव्रतपूजायां ॥ अतिभयानके अभयानके च त्रि ॥

अघोरा, स्त्री, (नास्ति घोरा भयानका मूर्त्तिर्यस्याः। अतिभयानका इति व्युत्पत्त्यर्थः) भाद्रकृष्णचतुर्द्दशी। यथा,—

"भाद्रे मास्यसिते पक्षे अघोराख्या चतुर्द्दशी।
तस्यामाराधितः स्थाणुर्नयेच्छिवपुरं ध्रुवं" ॥

इति स्मृतिः॥

अघोषः, त्रि, (नास्ति घोषः शब्दो यत्र बहुव्रीहिः शब्दशून्ये, न अल्पः घोषः शब्दो यत्र बहुव्रीहिः अल्पध्वनियुक्तं। तथाहि,—

"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिताः" ॥

इति स्मरणात्।) आभीरशून्यदेशादिः। शब्दरहितः। अल्पध्वनियुक्तः। कलापादिव्याकरणस्य संज्ञाविशेषे पुं। स तु वर्गप्रथमद्वितीयवर्णाः शषसाश्च ॥

अघ्न्यः, पुं, (न हन्ति विनाशयति सकृत्वात् न+हन्+कर्त्तरि यक्। निपातनात् साधु।) ब्रह्मा। इत्युणादिकोषः ॥

अघ्न्या, स्त्री, (न हन्यते या हन्+कर्म्मणि यक् स्त्रियामाप्। प्रतिं वो अघ्न्यानां धनूनाम् इति वेदः। "अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतामपि" ॥ इति निषेधात्।) स्त्रीगवी। इत्यमरः ॥

अङ्क त् क पदे। लक्षणे। इति कविकल्पद्रुमः ॥ कण्ठवर्गाद्योपधः। पदं सङ्ख्यासंस्थानं। लक्ष्म चिह्नयुक्तक्रिया। तथा च,—

"अर्थक्रियैव धातूनां कर्त्तृव्यापारलक्षणा।
आत्मनिष्ठं क्रियार्थत्वं धात्वर्थेष्वक्रियात्मसु" ॥

इति वोपदेवः ॥

"अङ्कयत्यरिसैन्यानि युधि एषेषु शायकैः"। इति हलायुधः ॥ अङ्कयति अङ्कापयति। इति दुर्गादासः ॥

अङ्कः, पुं, (अङ्कयति चिह्नयति, अङ्क+अच्) चिह्नं। (स्वनामकाङ्कं निचखान शायकं इति रघुवंशे।) क्रोड़ं। (सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकं। इति विष्णुपुराणे।) रूपकविशेषः। अपराधः। रेखा। विभूषणं। समीपं। स्थानं। नाटकांशः। इति मेदिनी ॥ (प्रत्यक्षनेतृचरितो रसभावसमुज्ज्वलः। भवेदगूढशब्दार्थः क्षुद्रचूर्णकसंयुतः ॥ अन्तर्निष्क्रान्तनिखिलपात्रोऽङ्क इति कीर्त्तितः। इति साहित्यदर्पणे)। चित्रयुद्धं। इति विश्वः ॥ शरीरं। इत्युणादिकोषः ॥ नवसङ्ख्या। इति ज्योतिषं ॥ (कुचभूषायां प्रकरणे। अगे। कटिप्रदेशे। कलङ्के। एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः। इति कुमारसम्भवे।)

अङ्कतिः, पुं, (अञ्चते पूज्यतेऽसौ अनुच+कर्म्मणि अति न्यङ्क्वादीनाञ्च इति पाणिनिसूत्रेण चस्य कः। वायुपक्षे अञ्चति गच्छति इति व्युत्पत्त्या) ब्रह्मा। अग्निः। अग्निहोत्री। इति विश्वः॥ वायुः। इति त्रिकाण्डशेषः ॥

अङ्कनं, क्ली, (अङ्क+णिच् भावे ल्युट्) सङ्ख्यासंस्थानं। चिह्नयुक्तीकरणं। आँकन् दागन इति भाषा। चिह्नकरणं। यथा पराशराङ्गिरसौ।

"अन्यचाङ्कनलक्ष्माभ्यां वाहनिर्म्मोचने कृते।
सायं संयमनार्थन्तु न दुष्येद्रोधबन्धयोः" ॥

अङ्कनं त्रिशूलादिचिह्नकरणं। लक्ष्म स्थिरचिह्नकरणं। इति प्रायश्चित्ततत्त्वं ॥

अङ्कपालिका, स्त्री, (अङ्कपालि+स्वार्थे कः स्त्रियामाप्।) आलिङ्गनं। इति शब्दमाला ॥

अङ्कपाली, स्त्री, (अङ्केन क्रोड़ेन पालयति अङ्क+पा+अलि स्त्रियां वा ङीप् पक्षे अङ्कपालिः।) आलिङ्गनं। धात्री। वेदिकाख्यगन्धद्रव्यं। तस्य नामान्तरं कोटिः। इति मेदिनी ॥

अङ्कलोड्यः, पुं, (अङ्केन लोड्यतेऽसौ लोड़+ण्यत्) चिञ्चोटकवृक्षः। चेँचूको इति भाषा। चिञ्चोड़मूल इति केचित् ॥ अस्य गुणाः। गुरुत्वं। अजीर्णकारित्वं। शीतलत्वञ्च। इति राजवल्लभः ॥

अङ्कितः, त्रि, (अङ्क+क्त।) लाञ्छितः। चिह्नितः। इति व्याड़िः ॥

अङ्की, स्त्री, (अङ्कः+स्त्रियां ङीप्।) अङ्क्यः। मृदङ्गविशेषः। इति शब्दरत्नावली ॥

अङ्कुरः, पुं, (अङ्क+उरच्) वीजोद्भवः। नूतनोत्पन्नतृणादिः। (दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे तन्वी स्थिता कतिचिदेव पदानि गत्वा। इति शाकुन्तले। अस्य पर्य्यायः। अभिनवोद्भिद् २। इत्यमरः ॥ उद्भेदः ३ प्ररोहः ४ (चूताङ्कुरास्वादकषायकण्ठः।इति कुमारसम्भवे।) अक्रुरः ५। इति राजनिर्घण्टः। रोहः ६ अङ्कुरः ७। इति हेमचन्द्रः ॥ जलं। रक्तं। लोम। इति मेदिनी ॥

अङ्कुरकः, पुं, (अङ्क्यते तृणादिभिर्निर्म्मीयतेऽसौ अङ्क+उरच् ततः स्वार्थे क) नीड़ः। पक्षिवासस्थानं। इति शब्दमाला ॥

अङ्कुशः, पुं क्ली, (अङ्क्यते हस्तिचालनार्थमाहन्यतेऽनेन अङ्क+उशच्।) हस्तिचालनार्थलौहमयवक्राग्रास्त्रं। डाङ्गश इति भाषा। तत्पर्य्यायः। सृणिः २। इत्यमरः ॥ सृणिः ३। इति तट्टीका ॥ अङ्कूषः ४। इत्युणादिकोषः ॥ (रामायणे,—

"उष्ट्रान् हयान् खरान् नागान् अभ्यर्दयङ्कशाङ्कुशैः॥
कम्पना अङ्कुशा भल्लाः कालचक्रा गदास्तथा" ॥)

अङ्कुशदुर्धरः, पुं, (अङ्कुशेन दुर्ध्रियते दुर्द्दम्यतेऽसौ दुर्+धृ+कर्म्मणि खल्।) दुरन्तहस्ती। इति त्रिकाण्डशेषः ॥

अङ्कुशी, स्त्री, (अञ्चते आराध्यतेऽसौ बौद्धविशेषैः अङ्क+उशच् स्त्रियां ङीप्। न्यङ्क्वादीनाञ्च इति चस्य कः।) जिनानां चतुर्विंशतिशासनदेवतान्तर्गतदेवीविशेषः। इति हेमचन्द्रः ॥

अङ्कूरः, पुं, (अङ्क+खर्ज्जूरादित्वात् ऊरच् वा उरच्) अङ्कुरः। अभिनवोद्भिद्। इति हेमचन्द्रः ॥

अङ्कूषः, पुं क्ली, (अङ्क्यते हस्तिचालनार्थमाहन्यतेऽनेन अङ्क+ऊषच् करणे) अङ्कुशः। इत्युणादिकोषः ॥

अङ्कोटः, पुं, (अङ्क+ओटच्) अङ्कोठवृक्षः। इति रत्नमाला ॥

अङ्कोठः, पुं, (अङ्क्यतेऽनुभूयतेऽसौ अङ्क+ओठच्) वृक्षविशेषः। आकोड़ इति ख्यातः। धलआँकुड़ा इति केचित्। अस्य पर्य्यायः। निकोचकः २। इत्यमरः ॥ निकोठकः ३ निकोचकः ४। इति भरतः ॥ अङ्कोलकः ५ बोधः ६ नेदिष्ठः ७ दीर्घकीलकः ८। इति जटाधरः ॥ अङ्कोटः ९ रामठः १०। इति रत्नमाला ॥ कोठरः ११ रेची १२ गूढ़पत्रः १३ गुणस्नेहः १४ पीतसारः १५ मदनः १६ गूढ़वल्लिका १७ पीतः १८ ताम्रफलः १९ दीर्घकीलः २० गुणाढ्यकः २१ कोलकः २२ लम्बकर्णः २३ गन्धपुष्पः २४ रोचनः २५ विशानतैलगर्भः २६। अस्य गुणाः। कटुत्वं। स्निग्धत्वं। विषलूतादिदोषनाशित्वं। कफवायुहारित्वं। सूतशुद्धिकारित्वं। रेचकत्वञ्च ॥ * ॥ तत्फलगुणाः। शीतलत्वं। स्वादुत्वं। श्लेष्मनाशित्वं। गुरुत्वं। बलकारित्वं। धातुपोषकत्वं। विरेचकत्वं। वातपित्तदाहक्षयदुष्टरक्तनाशित्वञ्च। इति राजनिर्घण्टः ॥

अङ्कोलः, पुं, (अङ्क्यतेऽनुभूयतेऽसौ अङ्क+ओलच्) अङ्कोठवृक्षः। आकोड़ यस्य प्रसिद्धिः। इत्यमरटीकायां स्वामी ॥

अङ्कोलकः, पुं, (अङ्कोल+स्वार्थे कः) अङ्कोठवृक्षः। इति जटाधरः।

अङ्कोलिका, स्त्री, आलिङ्गनं। इति शब्दमाला ॥

अङ्कोल्लसारः, पुं, (अङ्कोल्लस्य सारः षष्ठीतत् स्थिरांशः।) स्थावरविषभेदः। इति हेमचन्द्रः ॥

अङ्क्यः, पुं, (अङ्क्यते वाद्यते हरीतक्याकृतिर्वाद्यविशेषः यः। अङ्क+ण्यत्।) हरीतक्याकृतिमृदङ्गः। पाखवोयाज इति भाषा। इत्यमरः ॥ तदुक्तं,—

"सार्द्धतालत्रयायामश्चतुर्द्दशाङ्गुलाननः।
हरीतक्याकृतिर्यः स्यादङ्क्योऽङ्के स हि धार्यते ॥

इति भरतः ॥ (अपराधिविशेषाणां ललाटादिषु राज्ञा अङ्कनीयः। मनुः,—

"प्रायश्चित्तन्तु कुर्व्वाणाः सर्व्वे वर्णा यथोदितं।
नाङ्क्या राज्ञा ललाटे स्युर्दाप्यास्तूत्तमसाहसं" ॥)

अङ्ग, त् क पदे। (अङ्गयति चेष्टयति अङ्ग+णिच् अच्।) लक्षणे। इति कविकल्पद्रुमः ॥ कण्ठवर्गतृतीयोपधः। पदं सङ्ख्यासंस्थानं। लक्ष्म चिह्नयुक्तक्रिया। तथा च।

अर्थक्रियैव धातूनां कर्त्तृव्यापारलक्षणा।
आत्मनिष्ठं क्रियार्थत्वं धात्वर्थेष्वक्रियात्मसु ॥

इति बोपदेवः। अङ्गयति अङ्गापयति, इति दुर्गादासः ॥